कम्"। द्विजातिकर्म्म श्रौतमग्निहोत्रादि स्मार्त्तमष्टकादि प्रायश्चित्ततदङ्गजपादिव्यतिरिक्तं तेभ्यो हानिरनधिकारः इति द्विजातिग्रहणं प्राधान्यार्थं शूद्रस्यापि वाक्यान्तरेण पातित्याभिधानात्। इह लोके तावत् पातित्यलक्षणमनिष्टं परलोके चासिद्धिः पातककर्मप्रतिबन्धात् उपात्तसुकृतफलानिष्पत्तिः नरकं वा सूतकादिव्याहत्यर्थमिदम्। द्विजातिकर्मानधिकारश्च महापातके श्रूयते यथा देवलः "पञ्चैतानि महापातकानि कृत्वा ब्राह्मणः सद्भिर्नानुभाष्यो नानुग्राह्योऽभिशस्तः सर्वकर्मवर्जितः पतिततमो भवति"। महापातक्यधिकारे मनुः "असम्भाष्या ह्यसंभोज्या अविवाह्या ह्यपाठिनः। चरेयुः पृथिवीं दीनाः सर्वधर्मवहिष्कृताः"। अतो महापातकेषु द्विजातिकर्मानधिकारः तद्विहितद्वादशवार्षिकप्रायश्चित्तापनेयत्वादतिपातकानुपातकयोरपि। अतो द्वादशवार्षिकप्रायश्चित्तापनेयार्हं पापं पतनम्। अर्हता च सामान्यबोधितत्वं तच्च स्त्रीत्वादिनाऽसम्पूर्णानुष्ठानेऽप्यस्त्येव कृष्णले इवावघातस्य। अथ वा द्विजातिकर्मानधिकारापादकं पापं पतनम् अनधिकारश्च महापातके श्रुतएव अनुपातकेऽपि तत्समत्वात् उपपातकादौ च क्वचित् पततीति श्रुतेः अतिपातके ततो गुरुत्वात् लभ्यते। यद्वा महापातकानपकृष्टं पापं पतनम् अनुपातकस्य तत्समत्वात् उपपातकादेः क्वचित् पततीत्यभिधानात् अनपकर्षएव, अस्वजनब्राह्मणीगमने पतनपाताद्युत्पत्तिश्रवणादनपकर्षएव। अतएव "सद्यः पतति मांसेनेति" शूद्रावेदी पतत्यत्रे"रित्यादिमनुवचनं निन्दार्थम्।

२स्वधर्मच्युते "स्वधर्मं यः परित्यज्य परधर्मं समाश्रयेत्। अनापदि स विद्वद्भिः पतितः परिकीर्त्तितः" मार्क०पु० चाण्डालान्त्यादिस्त्रीगमनादिकमभ्यासकृतं पातित्यकारणम् "चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति" मत्स्यपु०। अन्यान्यपि कतिचित् कर्माणि पतितानामिव दाहनिषेधप्रयोजकान्युक्तानि शु०त० ब्रह्मपु० "गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः। क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम्। गिरिवृक्षप्रपातञ्च ये कुर्वन्ति नराधमाः। कुशिल्पजीविनश्चैव सूनालङ्कारकारिणः" तथा "ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः। महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः। पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः। न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित्" शु०त० ब्रह्मपु०। तेषां संसर्गनिषेधो यथा "आसनाच्छयनाच्चैकभोजनात् कथनादिषु। संवत्सरेण पतति पतितेन सहाचरन्" वराहपु० "पतितैः संप्रयुक्तानामिमां शृणुत निष्कृतिम्। संवत्सरेण पतति पतितेन सहाचरन्। याजनाध्यापनाद्यौनाद्यानपानाशनासनात्। यो येन पतितेनैव संसर्गं याति मानवः। स तस्यैव व्रतं कुर्य्यात् संसर्गस्य विशुद्धये" तत्र पादोनं प्रायश्चित्तमिति तत्र स्थितम्। "पतितस्योदकं कार्य्यं सपिण्डैर्ब्राह्मणैः सह। निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ। दासो घटमपां पूर्णं पर्य्यस्येत् प्रेतवत् सदा। अहोरात्रमुपासीनं नाशौचं ब्राह्मणैः सह। निवर्त्तयेरंस्तस्मात्तु सम्भाषणसहासनम्" मात्स्ये २०१अ०। "पतिता गुरवस्त्याज्या न तु माता कदाचन। गर्भधारणपोषाभ्यां तेन माता गरीयसी" मत्स्यपु०।

**पतित्वन** न० यौवने ऋ० १०।४०।९ भाष्ये दृश्यम्।

**पतिदेवता** स्त्री पतिरेव देवता यस्याः। पतिव्रतायाम् पतिदैवताऽप्यत्र। [रिण्याम्।

**पतिद्विष्** स्त्री पत्ये द्वेष्टि द्विष–क्विप् ४त०। पत्ये द्वेषका-

**पतिमती** स्त्री पति+अस्त्यर्थे मतुप् ङीप्। स्वामियुक्तायां भूम्यादौ।

**पतिलोक** पु० पतिभोग्यो लोकः स्वर्गादिः शा०त०। पत्या सहधर्माचरणेन प्राप्ये स्वर्गादिलोके मनुः ५।१५६

**पतिवत्नी** स्त्री पति+अस्त्यर्थे मतुप् नि० सधवायां मस्य वः नुक् च। सभर्त्तृकायां स्त्रियाम् अमरः। तद्भिन्नायान्तु पतिमतीत्येव सि० कौ०।

**पतिवेदन** पु० पतिं वेदयति विद–लाभे णिच्–ल्यु। पतिप्रापके महादेवे "त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्" यजु० ३।६०

**पतिव्रता** स्त्री पतिर्व्रतमिव नियतोपास्यत्वात् यस्याः। साध्व्यां स्त्रियाम् अमरः तद्धर्माश्च काशी०ख० ४अ० उक्ता यथा

"पतिव्रतेयं कल्याणी लोपामुद्रा सधर्मिणी। तवाङ्गच्छायया तुल्या यत्कथा पुण्यकारिणी। पतिव्रतास्वरुन्धत्या सावित्र्याप्यनुसूयया। शाण्डिल्यया च सत्या च लक्ष्म्या च शतरूपया। मेनया च सुनीत्या च संज्ञया स्वाहया तथा। तथैषा वर्ण्यते श्रेष्ठा न